
# तत्वाभिषेक महादिक्षा

# सहश्रसती

## द्वादशश्लोकी चण्डी



**अघोरी श्मशानेश्वर चण्डी**

# चण्डी साधनादेखि सिद्धिसम्म

हामी चेतनशिल प्राणी मानवजातीहरू सेलाएको एक शौर्य पिण्ड हौँ । हाम्रो पिण्डको संचालिका भनेकी माता चण्डी कुण्डलिनी महाशक्ती हुन । यसैले म सुझावका साथ भन्दछु "चण्डी जगाउ तिमी जाग्दछौँ" । तिमी जागे समाज जाग्दछ, समाज जागे देश जाग्दछ र तिम्रो देश जाग्यो भने एक दिन सारा संसार जाग्नेछ । संसारमा सनातन सभ्यता र संस्कृतिले व्यापकता लिने छ ।

कलहको युग कलिमा शान्ति, संमृद्धि र सफलता हाँसिल गर्न माता महाकाली को साधना गर्नु निर्विकल्प अपरिहार्य छ । जीवनलाई साधनाको यात्रामा समर्पित गर्दै गरेको साधनारत साधकले, लोकहित र कल्याण हेतु हरेक मनुष्यको सरल र सफल जीवनको चाहना र कामना गर्नु नै सच्चा साधक धर्म हो भन्ने ठान्दछु ।

आक्रान्त विश्व परिवेशमा चाहना, परिवन्ध र परिस्थितिले रुमलिएको मनुष्य जातीको हित र कल्याणका लागि श्रद्धेय गुरुदेव अखण्डेश्वर चण्डी बाबाज्यु द्वारा तत्वाभिषेक महादिक्षा मार्फत आफुलाई प्राप्त सहश्रसती द्वादशश्लोकी चण्डी साधना सूत्र जन हितका लागि उजागरित गरेकोछु । नित्यको निरन्तरतामा रहेर यो सिद्ध प्रमाणित चण्डी साधना सूत्रलाई साधकले साधना नियमको पूर्ण पालना गरी पाठ गर्दै गएको खण्डमा कुण्डलिनी महाशक्ति जागरण गर्ने देखि क्रिया योगसम्म पुग्न सकिने सुनिस्चित छ ।

॥ जय अघोर ॥

# साधना गर्दा साधकले पालना गर्नपर्ने नियमहरू

१. चण्डी साधना गर्ने साधकको मन र चित्त शुद्ध-पवित्र हुनपर्दछ।

२. साधकको देह र वस्त्र शुद्ध नभएतापनि हृदय भाव पवित्र हुनुपर्दछ। ब्रह्मचर्य आचरणलाई पूर्ण पालना गर्नुपर्दछ । तर, "एक नारी ब्रह्मचारी" को मान्यतामा रहने साधकको हकमा ब्रह्मचर्य आचरण उल्लङघन भएको मानिने छैन ।

३. साधकले चण्डी पाठ गर्ने समयमा खाली पेटमा गर्नु उत्तम हुनेछ । यदी, भोजन गरेको छ भने पूर्णरूपमा पाचन भैसकेको हुनु पर्दछ। साधकले भोजनको हकमा सुरूची र सुपाच्य जुनसुकै भोजन गर्नबाट वञ्चित हुनु पर्दैन ।

४. विहानी प्रहरको सूर्योदय अगावै पाठ आरम्भ गर्नु अति उतम हुने छ। तर, रात्री प्रहरमा पाठ गर्दा भने सुर्यास्त पछि मध्य रात्रीको बाह्र बजे अगावै पाठ गरी सक्नुपर्दछ।

५. चण्डी पाठ आरम्भ गर्दा सम्भव भए अग्नि समिपमा रहेर पाठ गर्दा सर्वोतम हुनेछ । अन्यथा, आफूलाई अनुकुल हुने स्थानमा रहेर पाठ गर्न सकिन्छ। तर, जुनसुकै स्थानमा रहेर पाठ गर्दा विशेष परिस्थितिमा बाहेक अन्य अवस्थामा अनिवार्यरूपमा पाँच वटा धूप सल्काएर पाठ आरम्भ गर्नु पर्दछ। सम्भव भए एउटा दियोमा पाँच वटा पाँच सुते बत्ती सल्काएर पाठ गर्दा उत्तम हुन्छ।

॥ चण्डीसंकल्पमस्तु ॥

॥ श्री गणेशाय नम : ॥

## चण्डी पाठ आरम्भ

**(क) आसन ग्रहण गर्नु भन्दा पहिले :**

(१) हरि ॐ तत्सत् । हरि ॐ तत्सत् ॥ हरि ॐ तत्सत् ॥।
भन्दै ३ पटक मुख मा जल आचमन गर्ने ।

(२) हरि विष्णु । हरि विष्णु ॥ हरि विष्णु ॥।
भन्दै ३ पटक शिर मा जल सेचन गर्ने ।

**ख) मन देह र थान शुद्धि गर्दा**

दायाँ हातमा जल लिएर थान शुद्धि मन्त्र पढ्दै शिर देखि पाउ सम्म जल सेचन गर्दै देह शुद्धि गर्ने ।

## ॥ थान शुद्धि मन्त्र ॥

**ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।**
**यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यतरः शुचिः ॥**

(ग) सुखद् आसनमा वसेर पाँचवटा धुप सल्काउने र दाँया हात तर्फ राख्ने र चण्डी पाठ आरम्भ गर्ने ।

॥ श्री गणेशाय नम : ॥

## ॥ गुरूप्रार्थना मन्त्र : ॥

सहस्रारे महापद्मे किञ्जल्क - गण - सोभिते ।
पद्म - राग - समाभासां रक्त - वस्त्र - सुशोभिताम् ॥
रक्त - कंङकर्ण- पाणिं च रक्त - नूपुर शोमिताम् ।
शरविन्दु - प्रतीकाश - रक्तोद्भासित- कुण्डलाम् ॥
तरुणारुण - कल्पाभां करुणा - पूर्ण लोचनाम् ।
वराभयं - करां शान्तां स्मरामि नव - गौरवीम् ॥
स्व - नाथ - वामभागस्थां प्रफुल्ल - पद्म प्रत्राक्षीम् ।
प्रसन्न - वन्दनां क्षीण मध्यांध्याये शिवां गुरुम् ॥

## ॥ गुरूचरण पादुका मन्त्र : ॥

(स्फटिकको मालाले ११ पटक जप्ने)

ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौ हंस:शिव सोऽहं हंस:
स्वरुप निरुपण हेतवे श्री गुरुवे नम: ॥

## ॥ अथ सप्तशती पाठ आरम्भ ॥

॥ श्री गणेशाय नमः ॥

ॐ नमः पिशाचनिकरङ्कीनी त्रिशूलखड्गहस्ते सिंहारुढे
एह्येहि आगच्छ आगच्छ इमां पूजां गृह गृह स्वाहा ।
श्री सप्तशतीसरस्वत्यै नमः आवहयामि । ॐ ह्रीं चण्डिकायै नमः ॥

## ॥ अथ शापोद्धार मन्त्रः ॥

(स्फटिकको मालाले ७ पटक जप्ने)

ॐ ह्रीं क्लीं श्रीं क्रां क्रीं चण्डिके देवी शापानुग्रहं कुरु कुरु स्वाहा ॥

## ॥ ततः उत्कीलनं मन्त्रः ॥

(स्फटिकको मालाले २१ पटक जप्ने)

ॐ श्रीं क्लीं ह्रीं सप्तशति चण्डिके उत्कीलनं कुरु कुरु स्वाहा ॥

## ॥ अथ कवचम् ॥

श्री गणेशाय नमः ॥ श्री सरस्वत्यै नमः ॥ श्री गुरुभ्यो नमः ॥
श्रीकुलदेवताभ्यो नमः ॥ अविघ्नमस्तु ॥ ॐ नारायणाय नमः ॥
ॐ नराय नरोत्तमाय नमः ॥ ॐ सरस्वतीदेव्यै नमः ॥
ॐ वेदव्यासाय नमः ॥ ॐ नमश्चण्डिकायै ॥

॥ ॐ मार्कण्डेय उवाच ॥

## ॥ क्षमा प्रार्थना ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ १ ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥ २ ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥ ३ ॥
अपराधशतं कृत्वा जगदम्बेति चोच्चरेत् ।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥ ४ ॥
सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके ।
इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु ॥ ५ ॥
अज्ञानाद्विविस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ ६। ।
कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥ ७ ॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥ ८ ॥

॥ श्री दुर्गार्पणमस्तु ॥

## ॥ मूल मन्त्रः ॥

(स्फटिकको मालाले १ माला जप्ने)

**ॐ ह्रीं ह्रीं ॥**

## ॥ अथ नवार्णमन्त्रः ॥

(स्फटिकको मालाले १ माला जप्ने)

**ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥**

॥ ॐ श्री दुर्गायै नमः ॥

# ॥ श्री दुर्गाष्टोत्तरशतनामस्तोत्रम् ॥

## ईश्वर उवाच

शतनाम प्रवक्ष्यामि शृणुष्व कमलानने ।
यस्य प्रसादमात्रेण दुर्गा प्रीता भवेत् सती ॥ १ ॥

ॐ सती साध्वी भवप्रीता भवानी भवमोचनी ।
आर्या दुर्गा जया चाद्या त्रिनेत्रा शूलधारिणी ॥ २ ॥

पिनाकधारिणी चित्रा चण्डघण्टा महातपाः ।
मनो बुद्धिरहंकार चित्तरुपा चिता चितिः ॥ ३ ॥

सर्वमन्त्रमयी सत्ता सत्यानन्दस्वरुपिणी ।
अनन्ता भाविनी भाव्या भव्याभव्या सदागतिः ॥ ४ ॥

शाम्भवी देवमाता च चिन्ता रत्नप्रिया सदा ।
सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी ॥ ५ ॥

अपर्णानेकवर्णा च पाटला पाटलावती ।
पट्टाम्बरपरीधाना कलमञ्जीररञ्जिनी ॥ ६ ॥

अमेयविक्रमा क्रुरा सुन्दरी सुरसुन्दरी ।
वनदुर्गा च मातङ्गी मतङ्गमुनिपूजिता ॥ ७ ॥

ब्राह्मी माहेश्वरी चैन्द्री कौमारी बैष्णवी तथा ।
चामुण्डा चैव वाराही लक्ष्मीश्च पुरुषाकृतिः ॥ ८ ॥

विमलोत्कर्षिणी ज्ञाना क्रिया नित्या च बुद्धिदा ।
बहुला बहुलप्रेमा सर्ववाहनवाहना ॥ ९ ॥

निशुम्भशुम्भहननी महिषासुरमर्दिनी ।
मधुकैटभहन्त्री च चण्डमुण्डविनाशिनी ॥ १० ॥

सर्वासुरविनाशा च सर्वदानवघातिनी ।
सर्वशास्त्रमयी सत्या सर्वास्त्रधारिणी तथा ॥ ११ ॥

अनेकशस्त्रहस्ता च अनेकास्त्रस्य धारिणी ।
कुमारी चैककन्या च कैशोरी युवती यतिः ॥ १२ ॥

अप्रौढा चैव प्रौढा च वृद्धमाता बलप्रदा ।
महोदरी मुक्तकेशी घोररुपा महाबला ॥ १३ ॥

अग्निज्वाला रौद्रमुखी कालरात्रिस्चतपस्विनी ।
नारायणी भद्रकाली विष्णुमाया जलोदरी ॥ १४ ॥

शिवदूती कराली च अनन्ता परमेश्वरी ।
कात्यायनी च सावित्री प्रत्यक्षा ब्रह्मवादिनी ॥ १५ ॥

य इदं प्रपठेन्नित्यं दुर्गानामशताष्टकम् ।
नासाध्यं विद्यते देवि त्रिषु लोकेषु पार्वति ॥ १६ ॥

धनं धान्यं सुतं जायां हयं हस्तिनमेव च ।
चतुर्वर्गं तथा चान्ते लभेन्मुक्तिं च शाश्वतीम् ॥ १७ ॥

कुमारीं पूजयित्वा तु ध्यात्वा देवीं सुरेश्वरीम् ।
पूजयेत् परया भक्त्या पठेन्नामशताष्टकम् ॥ १८ ॥

तस्य सिद्धिर्भवेद् देवि सर्वैः सुरवरैपि ।
राजानो दासतां यान्ति राज्यश्रियमवाप्नुयात् ॥ १९ ॥

गोरोचनालक्तककुङ्कुमेन सिन्दुरकर्पुरमधुत्रयेण ।
विलिख्य यन्त्रं विधिना विधिज्ञो भवेत् सदा धारयते पुरारिः ॥ २० ॥

भौमावास्यानिशामग्रे चन्द्रे शतभिषां गते ।
विलिख्य प्रपठेत् स्तोत्रं स भवेत् सम्पदां पदम् ॥ २१॥ ।

॥ इति श्री दुर्गाष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥



# ॥ अथ तान्त्रोक्तं देविसूक्तम् ॥

देव्युवाच:

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ १ ॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरुपिण्यै सुखायै सततं नमः ॥ २ ॥

कल्याण्यै प्रणतां वृद्धयै सिद्धयै कुर्मै नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ ३ ॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ ४ ॥

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ ५ ॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ६ ॥

या देवी सर्वभूतेषु चेतनेत्येविधीयेते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ७ ॥

या देवी सर्वभूतेषु बुद्धिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ८ ॥

या देवी सर्वभूतेषु निद्रारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ९ ॥

या देवी सर्वभूतेषु क्षुधारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १०॥

या देवी सर्वभूतेषु छायारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ११ ॥

या देवी सर्वभूतेषु शक्तिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १२ ॥

या देवी सर्वभूतेषु तृष्णारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १३ ॥

या देवी सर्वभूतेषु क्षान्तिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १४ ॥

या देवी सर्वभूतेषु जातिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १५ ॥

या देवी सर्वभूतेषु लज्जारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १६ ॥

या देवी सर्वभूतेषु शान्तिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १७ ॥

या देवी सर्वभूतेषु श्रद्धारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १८ ॥

या देवी सर्वभूतेषु कान्तिरुपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १९ ॥

या देवी सर्वभूतेषु लक्ष्मीरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २० ॥

या देवी सर्वभूतेषु वृत्तिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २१ ॥

या देवी सर्वभूतेषु स्मृतिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २२ ॥

या देवी सर्वभूतेषु मोहरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २३ ॥

या देवी सर्वभूतेषु बोधरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २४ ॥

या देवी सर्वभूतेषु दयारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २५ ॥

या देवी सर्वभूतेषु तुष्टिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २६ ॥

या देवी सर्वभूतेषु पुष्टिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २७ ॥

या देवी सर्वभूतेषु मातृरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २८ ॥

या देवी सर्वभूतेषु भ्रान्तिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २९ ॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।
भूतेषु सततं तस्मै व्याप्तैदेव्यै नमो नमः ॥ ३० ॥

चितिरुपेण या कृत्स्नमेतद् द व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३१ ॥

स्तुता सुरैः पुर्वमभीष्टसंश्रयात्तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरेश्वरी शुभानी भद्राण्यभिहन्तु चापदः ॥ ३२ ॥

या साम्प्रतं चोद्धतदैत्यतापितै रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नःसर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ३३ ॥

इति देवीसूक्तं पठित्वा अष्टोत्तरसशतं ।
नर्वाणमन्त्रजपं कृत्वा तदुत्तरन्यासान् विधाय ॥ ३४ ॥

गुह्यातिगुह्यगोप्त्री त्वं गृहणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्महेश्वरि ॥ ३५ ॥

। देव्या वामहस्ते जपम् निवेदयेत् ।



# ॥ सिद्धकुञ्जिकास्तोत्रम् ॥

शिव उवाच:

ॐ शृणु देवि प्रवक्ष्यामि कुञ्जिकास्तोत्रमुत्तमम् ।
येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेत् ॥ १ ॥

न कवचं नार्गलास्तोत्रं कीलकं न रहस्यकम् ।
न सुक्तं नापि ध्यानं च न न्यासो न च वार्चनम् ॥ २ ॥

कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत् ।
अति गुह्यतरं देवि देवानामपि दुर्लभम् ॥ ३ ॥

गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति ।
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम् ॥
पाठमात्रेण संसिद्धयेत् कुञ्जिकास्तोत्रमुत्तमम् ॥४॥

## ॥ अथ मन्त्रः ॥

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥ ॐ ग्लौं हुं क्लीं जूं सः
ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल
ऐं ह्रीं क्लीं चामुण्डायै विच्चे ज्वल हं सं लं क्षं फट् स्वाहा ॥

नमस्ते रुद्ररुपिण्यै नमस्ते मधुमर्दिनि ।
नमः कैटभहारिण्यै नमस्ते महिषासिद्धिनी ॥ १ ॥

नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि ।
जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे ॥ २ ॥

ऐंकारी सृष्टिरुपायै ह्रींकारी प्रतिपालिका ।
क्लींकारी कामरुपिण्यै बीजरुपे नमोऽस्तुते ॥ ३ ॥

चामुण्डा चण्डघाती च यैकारी वरदायिनी ।
विच्चे चाभयदा नित्यं नमस्ते मन्त्ररुपिणि ॥ ४ ॥

धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी ।
क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरु ॥ ५ ॥

हुं हुं हुंकाररुपिण्यै जं जं जं जम्भनादिनी ।
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः ॥ ६ ॥

अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा ॥ ७ ॥

पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा
सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं घ कुरुष्व मे ॥ ८ ॥

इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्तिहेतवे ।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति ॥ ९ ॥

यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत् ।
न तस्य जायते सिद्धिधरण्ये रोदनं यथा ॥ १० ॥

॥ इति श्री शिवपार्वतीसंवादे कुञ्जिकातोत्रं सम्पूर्णम् ॥

## ॥ कालीतेजस्वी मन्त्र : ॥

(स्फटिकको मालाले २७ पल्ट जप्ने)

क्रीं क्रीं क्रीं ह्रीं ह्रीं हूं हूं दक्षिणे कालिके
क्रीं क्रीं क्रीं ह्रीं ह्रीं हूं हूं स्वाहा ॥

# ॥ श्री अम्बेजीकी आरती ॥

ॐ जय अम्बे गौरी मैया जय श्यामागौरी ।
तुमको निशिदिन ध्यावत हरि ब्रह्मा शिव री ॥१॥ ॐ जय अम्बे गौरी०
माँग सिन्दुर विराजत टीको मृगमदको ।
उज्ज्वलसे दोउ नैना, चन्द्रवदन नीको ॥२॥ ॐ जय अम्बे गौरी०
कनक समान कलेवर रक्ताम्बर राजै ।
रक्त-पुष्प गल माला, कण्ठन पर साजै ॥३॥ ॐ जय अम्बे गौरी०
केहरि वाहन राजत, खड्ग खपर धारी ।
सुर-नर-मुनि-जन सेवत, तिनके दुखहारी ॥४॥ ॐ जय अम्बे गौरी०
कानन कुण्डल शोभित, नासाग्रे मोती ।
कोटिक चन्द्र दिवाकर सम राजत ज्योति ॥५॥ ॐ जय अम्बे गौरी०
शुम्भ निशुम्भ विदारे, महिषासुर घाती ।
धुम्रविलोचन नैना निशिदिन मदमाती ॥६॥ ॐ जय अम्बे गौरी०
चण्ड मुण्ड संहारे, शोणितबीज हरे ।
मधु कैटभ दोउ मारे, सुर भयहीन करे ॥७॥ ॐ जय अम्बे गौरी०
ब्रह्माणी, रुद्राणी तुम कमलारानी ।
आगम-निगम-बखानी, तुम शिव पटरानी ॥८॥ ॐ जय अम्बे गौरी०
चौंसठ योगिनि गावत, नृत्य करत भैरुँ ।
बाजत ताल मृदंगा औ बाजत डमरु ॥९॥ ॐ जय अम्बे गौरी०

तुम ही जगकी माता, तुम ही हो भरता ।
भक्तनकी दुख हरता सुख सम्पति करता ॥१०॥ ॐ जय अम्बे गौरी०
भुजा चार अति शोभित, वर-मुद्रा धारी ।
मनवाञ्छित फल पावत, सेवत नर-नारी ॥११॥ ॐ जय अम्बे गौरी०
कंचन थाल विराजत अगर कपुर बाती ।
(श्री) मालकेतुमें राजत कोटिरतन ज्योति ॥१२॥ ॐ जय अम्बे गौरी०
(श्री) अम्बेजीकी आरति जो कोइ नर गावै ।
कहत शिवानन्द स्वामी, सुखसम्पत्ति पावै ॥१३॥ ॐ जय अम्बे गौरी०

## ॥ अथ शापोद्धार मन्त्रः ॥

(स्फटिकको मालाले ७ पटक जप्ने)

ॐ ह्रीं क्लीं श्रीं क्रां क्रीं चण्डिके देवी शापानुग्रहं कुरु कुरु स्वाहा ॥

## ॥ तत : उत्कीलनं मन्त्रः ॥

(स्फटिकको मालाले २१ पटक जप्ने)

ॐ श्रीं क्लीं ह्रीं सप्तशति चण्डिके उत्कीलनं कुरु कुरु स्वाहा ॥

# ॥ क्षमा प्रार्थना ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ १ ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥ २ ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥ ३ ॥
अपराधशतं कृत्वा जगदम्बेति चोच्चरेत् ।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥ ४ ॥
सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके ।
इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु ॥ ५ ॥
अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ ६। ।
कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥ ७ ॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥ ८ ॥

॥श्री दुर्गार्पणमस्तु॥

## ॥ शिवशक्तिनाम मन्त्र ॥

(स्फटिकको मालाले १०८ पटक जप्ने)

**॥ ॐ परमतत्त्वाय शिवशक्तिस्वरुपाय नमःशिवाय ॥**

## ॥ अधोर मन्त्र ॥

(रुद्राक्षको मालाले जप्ने)

**अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः ।**
**सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररुपेभ्यः ॥**

(रुद्राक्षको मालाले १, ३, ५, ८, ११, १५, २१, २७, ५४ पटक वा १०८ पटकनै साधकले आफ्नो स्वेच्छा पुर्वक जप गर्न सकिन्छ । यो मन्त्र लाई जप गर्दा शिवजीको हृदयलाई स्पन्दनगर्न पुग्दछ ।)

जानकारीः (माथि उल्लेखित तन्त्रोक्तं देवीसूक्तम् र सिद्धकुञ्जिकास्तोत्रको ७,२०० पटक पाठ गरेपछि मात्र चण्डीको हवन गर्ने अधिकार प्राप्त हुन्छ ।)